॥ षट्प्रश्नोपनिषत्खंडार्थप्रारंभः ॥

SGDF
Sri Gangeshwari Digital Foundation

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ श्रीरंगविट्ठलंनत्वासर्वज्ञादिगुरूनपि ॥ षट्प्रश्नाख्योपनिषदष्टीकोक्तार्थोनिगद्यते ॥ इहखलुसंसारपारावारेनिपतितमधिकारिणंजनंजननीतनयमिवपरमात्मतत्वज्ञानप्लवेनोद्धर्तुंप्रवृत्तेयमाथर्वणीब्राह्मणोपनिषत् । अस्याउपनिषदोवासुदेवोमुख्यतयाप्रतिपाद्योदेवता । प्राणादयस्तुतच्छेषतयातथेतिज्ञेयं । पिप्पलादादयऋषयः । छंदस्तुक्वचिदक्षरपरिगणनयाज्ञेयं । अत्रसुकेशाइत्यादिकाख्यायिका विद्याप्रशंसया श्रोतृणांश्रद्धाजननार्था । एवंकिलमहद्भिर्भारद्वाजप्रभृतिभिरपीयंविद्यासंवत्सरब्रह्मचर्यादिनालब्धा । अतोतिप्रशस्ततरा । अतो

॥ हरिॐ ॥ सुकेशाचभारद्वाजःशैब्यश्चसत्यकामःसौर्यायणीचगार्ग्यःकौसल्यश्चाश्वलायनोभार्गवोवैदर्भिःकबंधीकात्यायनस्तेहैतेब्रह्मपराब्रह्मनिष्ठाःपरंब्रह्मान्वेषमाणाःएषहवैतत्सर्ववक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः ॥ १ ॥

स्माभिरप्येवंविधैर्भाव्यमिति । स्मर्यतेहिश्रद्धादीनांतत्वज्ञानहेतुत्वंश्रद्धावांल्लभतेज्ञानमित्यादिना । अत्रेयमक्षरयोजना । सुकेशानामतःभरद्वाजस्यापत्यंभारद्वाजः । १ । शिबेरपत्यंशैब्यःसत्यकामोनामतः । २ । सूर्यस्यापत्यंसौर्यः । तदपत्यंसौर्यायणिः । दीर्घःसुलोपश्छांदसइतिसएवसौर्यायणी । गर्गस्यगोत्रोगार्ग्यः । ३ । कौसल्योनामतः । कोसलायांभवोवा । अश्वलस्यापत्यमाश्वलायनः । ४ । भृगोरपत्यंभार्गवः । विदर्भेषुभवोवैदर्भिः । ५ । कबंधीनामतः । कत्यस्यापत्यंकात्यायनः । ६ । इतरेतरयोगेचशब्दाः । तएतेहकिलब्रह्मपराःवेदाभ्यासेतात्पर्यवंतः । ब्रह्मनिष्ठाः । तदुक्तानुष्ठानशीलाश्चमुनयः कदाचित्क

चित्समवेताःपरंब्रह्मवासुदेवंअन्वेषमाणाजिज्ञासवोबभूवुरितिशेषः । ब्रह्मपराइत्यादिब्रह्मजिज्ञासाधिकारसंपत्तिकथनं । तत स्तेकिलैषपिप्पलादःयद्वयंपृच्छामःतत्सर्ववक्ष्यतितस्मादेनंगच्छामइतिनिश्चित्यसमित्पाणयोभूत्वाभगवंतंपूज्यं पिप्पलादमुपस न्नाः तत्समीपंप्राप्ताः । वैशब्दःपिप्पलादस्यप्रश्नप्रतिवचनसामर्थ्यद्योतकः ॥१॥ तानागतान्हकिलसऋषिः पिप्पलादउवाच । किमिति । यद्यपियूयंप्रागेवतपआदिसंपन्नाः । तथापिभूयःपुनरेवतपसासर्वेंद्रियनिग्रहलक्षणेनविशेषतोपिब्रह्मचर्येणश्रद्धया स्तिक्यनिष्ठयायुक्ताःसंवत्सरमेकमस्मान्परिचरंतःसंवत्स्यथसम्यग्वसत । ततोयथेष्टंप्रश्नान्प्रष्टव्यार्थान्पृच्छत । ततोयुष्माभिः

तान्हसऋषिरुवाच।भूयएवतपसाब्रह्मचर्येणश्रद्धयासंवत्सरंसंवत्स्यथ । यथाकामंप्रश्नान्पृच्छत। यदिविज्ञास्यामःसर्वंहवोवक्ष्यामइति ॥ २ ॥ अथकबंधीकात्यायनउपेत्यपप्रच्छ । भगवन्कुतो हवाइमाःप्रजाःप्रजायंतइति । तस्मैसहोवाच । प्रजाकामोहवैप्रजापतिः । सतपोतप्यत ॥ ३ ॥

पृष्टंप्रतिवक्तुंयदिवयंविज्ञास्यामः । तर्हिसर्ववोयुष्मभ्यंवक्ष्यामइति । नह्येवंसतिअवचनेकारणमस्तीतिहशब्दः ॥ २ ॥ अथउ क्तनियमसमनुष्ठानानंतरंतेषांमध्येकबंधीकात्यायनःउपेत्योपसदनंकृत्वापिप्पलादंपप्रच्छ । पाठक्रमादर्थक्रमोबलीयानितिपश्चा दुक्तस्यापिकात्यायनस्यप्रश्नप्रतिवचनंप्रथममुक्तं । एवमन्यत्रापिद्रष्टव्यं । तंचक्रमंतत्रैवदर्शयिष्यामः । किमिति । भगवन्कु तोनिमित्तकारणात्पुरुषादिमाःदेवाद्याःसर्वाःप्रजाःप्रजायंतेउत्पद्यंतइति । हवाइतिप्रजानांप्रजननस्यसुप्रसिद्धताद्योतकौनि

पातौ । सुप्रसिद्धंतावत्प्रजानांप्रजननं । नचैतदंतरेणकारणमुपपन्नं । सर्वदापिप्रसंगात् । न चाचेतनैरेवकारणैः । चेतनानधिष्ठितानांतेषांकार्यकर्तृत्वादर्शनात् । नचजीवोधिष्ठाता । अस्वतंत्रत्वात् । नापीश्वरः । तदनुपलंभादितिप्रश्नाभिप्रायः । यद्यपि भगवान्सर्वेषांनप्रत्यक्षगोचरोवर्तमानःकुलालादयोघटादिकमिवप्रजाःप्रजनयति । तथापिजगत्कारणीभूतान्प्राणादीनुत्पाद्यतेष्वाविश्यतान्निमित्तीकृत्यनिखिलाःप्रजाःजनयतीति नकश्चिद्विरोधइत्याशयवान्तस्मैपृष्टवतेकात्यायनायसपिप्पलादः किलोत्तरमुवाच । किमिति । प्रजानांब्रह्मादीनांपतिः पालकः परमेश्वरः कल्पादौकिलात्मनः प्रजाकामोदेवादिप्रजाव

समिथुनमुत्पादयते । रयिंचप्राणंचेत्येतौमेबहुधाप्रजाःकरिष्यतइति । आदित्योहवैप्राणोरयिरेवचंद्रमाः ॥ ४ ॥

त्त्वमात्मनइच्छन्नवर्तत । अथसर्वज्ञोपिलोकविडंबनायतपोतप्यत । कर्तव्यमन्वालोचयत् ॥ ३ ॥ आलोचितकार्यस्सप्रजापतिः मिथुनंस्त्रीपुरुषद्वंद्वंउत्पादयतेउदपादयत् । नचप्राणादिजननेनास्यप्रयोजनंशंकनीयं । तत्स्वाभाव्यादित्युत्पादयतइतिवर्तमानापदेशेनाह । किंतन्मिथुनंरयिंवित्ताभिमानिनींभारतींप्राणंमुख्यंचेत्येतत् । सर्वाःप्रजाःसिसृक्षुःपरमेश्वरः कथंतावुदपादयत् इतिचेत् । एवंमन्यतेस्मप्रजापतिः । एतौरयिप्राणौमेममबहुविधाःप्रजाःकरिष्यतइति । एतावाविश्याहंप्रजाःस्रक्ष्यामि । इमौमेप्रजासर्जनेनिमित्तीभविष्यतइति । अभूतांचतौप्रजापतेः प्रजासर्जनेनिमित्तमित्युच्येते । आदित्यइत्यादिना । ततोसौ

SGDF
Sri Gargeshwari Digital Foundation

प्राणःप्रजापतिनादित्यादिषुसृष्टेष्वादित्यः आदित्यनामाआदित्यंप्रविष्टोबभूव । रयिरेवरयिरपिचंद्रमाः चंद्रमानाम्नीचंद्रमस्या विष्टाबभूव । एवंचंद्रसूर्यगतौतावाविश्यतौनिमित्तीकृत्यप्रजापतिःप्रजास्ससर्जेतिवाक्यशेषः ॥ ४ ॥ प्रकारांतरेणप्रजोत्पत्तिनि मित्तत्वंउच्यतेरयिर्वाइत्यादिना । एतत्सर्वंरयिर्वैप्रमाणसिद्धमेतत् । किंतत्सर्वंतेजोबन्नलक्षणमूर्तंअमूर्तंचप्रकृत्यादिकमितिय दुपादानकारणराशिद्धयंतस्माद्राशिद्धयात्प्रविभक्तायामूर्तिःयन्मूर्तंसैवरयिः । सप्तम्यर्थेचेयंपंचमी । अमूर्तंप्राणइतिशेषः । रयिप्राणौजगदुपादानेषुपंचभूतेषुप्रकृत्यादिषुचस्थित्वातेषामुपादानत्वशक्तिंप्रेरयंतौप्रजापतेःप्रजोत्पात्तौनिमित्तंभवतइतियाव

रयिर्वाएतत्सर्वंयन्मूर्तंचामूर्तंचतस्मान्मूर्तिरेवरयिः । अथादित्यउदयन्यत्प्राचींदिशंप्रविशति तेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्ते । यद्दक्षिणांयत्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोय त्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते ॥ ५ ॥

त् । आदित्येस्थित्वाप्राणःप्रजोत्पत्तिनिमित्तंभवतीत्युक्तंतत्कथमित्यतउच्यते । अथेत्यादिना । अथशब्दःप्रकृतमूर्तादिप्रकारा दर्थांतरद्योतकः । आदित्यःआदित्यस्थःप्राणःउदयन्उद्गच्छन्प्राचींदिशंप्रकाशेनप्रविशतीतियत्तेनप्राच्यान्प्राचीदिक्पालान्त द्दिग्गतप्राणिप्रणयनात्प्राणशब्दोदितान्सभार्यैंद्राग्निरूपांश्चतुरोदेवान्रश्मिषुसन्निधत्तइत्यादियोज्यं । यद्दक्षिणांप्रविशतितेनद क्षिणदिक्पालान्प्राणान्सभार्ययमनिर्ऋतिरूपांश्चतुरोदेवान्रश्मिषुसन्निधत्ते । यत्प्रतीचींप्रविशतितेनप्रतीच्यान्प्राणान्सभार्य

SGDF
Sri Gargeshwari Digital Foundation

वरुणवायुरूपचतुरोदेवान्रश्मिषुसन्निधत्ते । यदुदीचींप्रविशतितेनोदीच्यान्सभार्यसोमेशानरूपचतुरोदेवान्रश्मिषुसन्निधत्ते । यदधःप्रविशतितेनाधस्तनान्सभार्यशेषमित्ररूपान्रश्मिषुसन्निधत्ते । यदूर्ध्वंप्रविशतितेनोर्ध्वान्प्राणान्सभार्यवींद्रकामरूपां श्चतुरोदेवान्रश्मिषुसन्निधत्ते । यदंतरादिशःदशदिशांमध्यंयत्प्रविशति तेनतत्रत्यान्प्राणान्रश्मिषुसन्निधत्ते । यदंतरादिशइति नावांतरदिगुक्तिः । अग्न्यादिकोणपालानांप्राच्यादिग्रहणेनैवगृहीतत्वात् । तथोक्तंभाष्ये । प्राच्याःप्राणास्तथेंद्राद्यादक्षिणा श्चयमादयः । प्रतीच्यावरुणाद्यास्तुसोमाद्याश्चोत्तराःस्मृताः । शेषमित्रावर्वाचीनौवींद्रकामावुदक्तनौ । सभार्याःकोणपैःसार्धं

सएषवैश्वानरोविश्वरूपःप्राणोग्निरुदयते । तदेतदृचाभ्युक्तं । विश्वरूपंकरिणंजातवेदसंपरायणं ज्योतिरेकंतपंतं । सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः ॥ ६ ॥

चत्वारोदिशिदिश्यपीति । दिङ्मध्यस्थाअपिकेचिज्ज्ञातव्याइतिटीकाकृतः । यत्सर्वमितिनिगमनं । अनेनाशेषजगत्प्रकाशकत यात्राजोत्पत्तिनिमित्तत्वमुक्तं ॥ ५ ॥ नकेवलमेतावत्किंनामसएषआदित्येस्थितोविश्वरूपःपूर्णरूपःअदनादग्निःप्राणोवैश्वानरो विश्वनरसंबंधीतापनपाचनशोषणादिनासर्वप्रजोत्पत्तिहेतुस्सन्नुदयते । आदित्योहवैप्राणइतियाग्रसिद्धिःसूचितासोच्यते तदेत दिति । यदुक्तंतदेतत्ऋचाविश्वरूपमितिमंत्रेणाभ्युक्तंस्पष्टमुक्तं । अतोदृढतरंप्रतिपत्तव्यमिति । विश्वरूपं । कारश्मयोऽ स्यसंतीतिकरीतंकरिणं । जातवेदसंजातस्यसर्वस्यवेदितारं परायणंसर्वप्राणिनांपरमाश्रयं एकंप्रधानं ज्योतिःप्रकाशकं तपंतंत

पनक्रियांकुर्वंतं । उपलक्षणमेतत् । शोषणादिकंचकुर्वाणं आदित्यमंडलस्थंपुरुषंजानीयात् । किमिति । सहस्ररश्मिःअनंत तेजाःशतधाअनंतरूपैःसर्वप्राणिषुवर्तमानोयःप्राणएषएवप्रजानामुत्पत्तयेसूर्येस्थित्वोदयतीति । एवंचंद्रमसिस्थितायादेव्याअ पिओषधिजननादिद्वारेणप्रजोत्पत्तिनिमित्तत्वमुपपादनीयमिति ॥ ६ ॥ अथसर्वोत्पत्तिनिमित्तकारणंसंवत्सरादिलक्षणंकालं तदवांतरभेदोत्तरायणाद्यधिष्ठातारौरयिप्राणौचाधिष्ठायप्रजापतेःप्रजाकारणत्वमुच्यते । संवत्सरइत्यादि । प्रजापतिःसंवत्सरो वैसंवत्सरस्थःसन्प्रजाजनयतीतिप्रसिद्धं । तस्यसंवत्सरस्यअयनेसूर्यगतिविशेषोपलक्षितौदेवयानपितृयाणलक्षणदेवताविशे

संवत्सरोवैप्रजापतिः । तस्यायनेदक्षिणंचोत्तरंच ॥ तद्येहवैतदिष्टापूर्तेकृतमित्युपासते । तेचां द्रमसमेवलोकमभिजयंते । तएवपुनरावर्तंतेतस्मादेतेऋषयःप्रजाकामादक्षिणंप्रतिपद्यंते । एष वैरयिर्यःपितृयाणः ॥ ७ ॥

षाभिमतौभागविशेषौनामतोदक्षिणंचोत्तरंच तयोःरयिप्राणावधिष्ठातारावितिशेषः। कुतएतदित्यतउच्यते। तद्येहवैतदित्यादि। ततूतत्रसाधकेषुयेऋषयःप्रजाकामाःमोक्षेतरफलकामाः संतइतियावत् । इष्टंयजनंपूर्तंअन्नदानादिकंकृतमन्यच्चकर्मइत्येतदु पासते अनुतिष्ठंति । तएतेदक्षिणंपितृयाणंप्रतिपद्यंते । प्रतिपन्नाश्चतेचांद्रमसंलोकमभिजयंतेप्राप्नुवंति । तएवपुनःस्वकर्मावसानेतस्माच्चंद्रलोकात्आवर्तंतेहवै । यतएवंपितृयाणेनगतानांपुनरावृत्तिमच्चंद्रलोकप्राप्तिलक्षणंफलंप्रसिद्धं । तस्माच्चंद्राधिष्ठा

त्रीरयिरेवैषःयःपितृयाणोवैपितृयाणाधिष्ठात्रीतिगम्यते ॥ ७ ॥ अथयेमुमुक्षवस्तपआदिसाधनैःपरमात्मानमन्विष्यविचार्य विदित्वाचोत्तरायणेनगताःतआदित्यमभिजयंते । ततश्चपरमंब्रह्मयस्मादेतद्वैदेवयानेनप्राप्यंब्रह्मैवप्राणानामिंद्रादीनांआयत नंआधारः एतदेवामृतमभयंचएतदेवपरायणंमुक्तानामप्याश्रयः । अतएतस्मान्नपुनरावर्ततइतितस्मादपुनरावृत्त्ययोग्यानां मार्गनिरोधकत्वादेवैषआदित्योनिरोधोविदुषामित्युच्यतेश्रुत्यंतरइति । यतएवमुत्तरायणेनगतानामपुनरावृत्तिमदादित्यलो कप्राप्तिलक्षणंफलंप्रसिद्धं । तस्मादादित्याधिष्ठाताप्राणएवोत्तरायणाधिष्ठातेतिज्ञायतइतिवाक्यशेषः । आदित्यंप्राप्ताना

अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्ययात्मानमन्विष्यादित्यमभिजयंते । एतद्वैप्राणानामायत नमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्ततइत्येषनिरोधः।तदेषश्लोकः । पंचपादंपितरंद्वाद शाकृतिंदिवआहुःपरेअर्धेपुरीषिणं।अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितमिति॥८॥

मपुनरावृत्तिरित्यत्रश्रुत्यंतरसंमतिरुच्यते । यदत्रोक्तंकेचित्पितृयानेनयांतिकेचिद्देवयानेनेति । तत्रैषवक्ष्यमाणःश्लोकोमंत्रः संमतित्वेनभवति । हेमंतशिशिरयोरैक्येनपंचऋतवः । तदभिमानिनःपादाःअंशायस्यतंपंचपादं । पितरंप्रजानांपा लंक । द्वादशमासाभिमानिदेवाआकृतयोरूपाणियस्यतंद्वादशाकृतिं । विचक्षणंविवेकिनं । सप्तचक्राणिचंक्रम्यतेरथए भिरित्यश्वायस्यासौसप्तचक्रः । षट्संख्याकाःअराःयस्यासौषळरः । तस्मिन्नर्पितं । वर्तमानंआदित्यंदिवोंतरिक्षस्यपरेअन्य

SGDF Sri Gargeshwari Digital Foundation

तरस्मिन्किंचिद्दक्षिणाश्रितभागेगच्छंतंपुरीषंउदकंतदस्यास्तीतिपुरीषिणंवर्षणहेतुंतदुपलक्षितकालाभिमानिदेवतामार्गमिति यावत् । केचित्काम्यकर्मिणःस्वप्राप्यमाहुः । अथतेभ्योन्येइमेज्ञानिनोदिवउपरेपरस्मिन्किंचिदुत्तराश्रितेभागेगच्छंतमादित्यंतदुपलक्षितकालाभिमानिदेवतामार्गंस्वप्राप्यमाहुरितियावत् ॥ ८ ॥ किंचमासोवैप्रजापतिः । मासलक्षणकालमधिष्ठाय प्रजाःसृजतीतियावत् । तस्यमासस्यावयवभूतःकृष्णपक्षएवरयिः । शुक्लपक्षःप्राणः । पक्षद्वयेस्थित्वाप्रजापतेःप्रजोत्पत्तौनिमित्तीभवतइतियावत् । कुतएतत् । यस्मात्खल्वादित्योत्तरायणाधिष्ठाताप्राणःशुक्लपक्षेस्थितस्तस्मादेवह्येतेउत्तरायणेनादित्यं

मासोवैप्रजापतिः । तस्यकृष्णपक्षएवरयिः । शुक्लःप्राणस्तस्मादेतेऋषयःशुक्लइष्टिंकुर्वंति । इतरइतरस्मिन् । अहोरात्रेवैप्रजापतिस्तस्याहरेवप्राणोरात्रिरेवरयिः । प्राणंवाएतेप्रस्कंदंतिये दिवारत्यासंयुज्यंते । ब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यंते ॥ ९ ॥

जिगमिषंतःशुक्लपक्षेइष्टिंयजनंनिष्कामंप्राणपूजात्मकंकुर्वंति । यस्माच्चंद्रदक्षिणायनाधिष्ठात्रीरयिःकृष्णपक्षेस्थिता । तस्मादेव हीतरेदक्षिणायनेनचंद्रमसंप्रप्संतऋषयः । इतरइतरस्मिन् । कृष्णपक्षेकाम्यांरयिपूजारूपामिष्टिंकुर्वंतीति । किंचाहोरात्रेइत्यादिपूर्ववद्व्याख्येयं । एकवद्भावस्यवैकल्पिकत्वेनश्रुतावहोरात्रेइतिप्रथमा । मासोवाइत्यादिप्रायपाठात् । प्राणंवाइत्यादिवाक्यंनसाक्षादहरेवप्राणइत्यनेनसंबध्यते । अतोमध्येदंपतीवैप्रजापतिः । पतिरेवप्राणोजायैवरयिरित्यध्याहार्यं ।

SGDF
Sri Gargeshwari Digital Foundation

एवंसतितदुपपादकत्वेनास्यसंबंधःयेदिवारत्यारतिहेतुभूतयास्त्रियासंयुज्यंते । संयोगमाचरंति । तएतेप्राणंप्रस्कंदंति । निर्गमयंति । यत्रक्वचनपरित्यजंति । यद्रात्रौरत्यासंयुज्यंते । तदिदंब्रह्मचर्यसममेवेतिप्रसिद्धं । तेनज्ञायतेरात्र्यधिष्ठात्रीरयिःस्त्रियांवर्ततेअहरधिष्ठाताप्राणःपुंसीति । तथाहि । दिवापुरुषरेतसिप्राणस्याधिकंसन्निधानंनतदादेव्यास्त्रियांतावत्सन्निधानं तथाचदिवापुरुषरेतसिस्थितेप्राणेस्त्रियंप्राप्तेयत्रक्वचनासावनेनत्यक्तोभवति । रात्रौतुस्त्रियांदेव्याअधिकंसन्निधानमितितदाप्राणःस्वभार्यामेवप्राप्तोभवतिइत्युपपद्यतइति ॥ ९ ॥ किंचान्नंवैप्रजापतिः । कथमन्नेवस्थितस्यप्रजापतेःप्रजा

अन्नंवैप्रजापतिस्ततोहवैतद्रेतः । तस्मादिमाःप्रजाःप्रजायंतइति । तद्येहवैतत्प्रजापतिव्रतंचरंति । तेमिथुनमुत्पादयंतेतेषामेवैषब्रह्मलोकोयेषांतपोब्रह्मचर्ययेषुसत्यंप्रतिष्ठितं । तेषामसौविरजो ब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति ॥ १० ॥ इतिप्रथमःप्रश्नः ॥ १ ॥

जनकत्वमित्यतउच्यते । ततोन्नात्खल्वेतद्रेतोभिजायते । किंततः । तस्माद्रेतसोहीमामनुष्यादिप्रजाःप्रजायंतइति । अन्नेस्थित्वातद्रेतोरूपेणपरिणाम्यैतदुपादानीकृत्यापिप्रजापतिःप्रजाःसृजतीतियावत् । एवंपरमेश्वरोनिमित्तोपादा(नभू)नीभूतान्पदार्थान्द्वारीकृत्यप्रजाःसृजतीतिविदुषःफलमुच्यते । तदित्यादि । तत्तत्रप्रजासुयेखलुपुरुषाःतदेतद्यथोक्तंप्रजापतेर्व्रतंकर्मचरंतिजानंति । तेमिथुनमुत्पादयंतेसाध्वपत्याभवंति । तेषामेवैषसत्याख्योब्रह्मलोकःप्राप्योभवतियेषांतपःब्रह्मचर्यंचास्ति । येषु

सत्यंसत्यवचनंचप्रतिष्ठितंनियमेनस्थितं । नकेवलमेतावत्किंतुयावद्ब्रह्मलयंतत्रस्थितानांतेषामेवासौविरजोऽप्राकृतोब्रह्मलोको वैकुंठादिःप्राप्योभवति । येषुजिह्मंकौटिल्यंअनृतंअसत्यवचनंमायाविप्रलिप्साइत्येवमादिदोषाःनसंतितेषामितिसंबंधः । स त्यवचनादिगुणाभिधानेननसिद्धस्याप्यनृतादिदोषाभावस्योक्तिरादरार्थेति ॥ १० ॥ इतिप्रथमप्रश्नप्रतिवचनं ॥ १ ॥ अथहैनं भार्गवः । प्रश्नार्थस्यउक्तानंतर्यसूचकोथशब्दः । उक्तंरपमेश्वरस्यसकलप्रजाजनकत्वं । लब्धजन्मनएवस्थित्यादीतिस्थितिज्ञा नहेतुत्वंवक्तव्यं । प्राक्प्राणस्यवरिष्ठत्वमभिप्रेतंतच्चोपपादनीयमितितदर्थमुत्तरग्रंथः । भगवन्कत्येव कियत्संख्याकादेवाःप्रजा

अथहैनंभार्गवोवैदर्भिःप्रपच्छ । भगवन्कत्येवदेवाःप्रजाविधारयंते । कतरएतत्प्रकाशयंते कःपुनरेषांवरिष्ठइति ॥ १ ॥ तस्मैसहोवाच । आकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्म नश्चक्षुःश्रोत्रंचतेप्राकाश्याअभिवदंति । वयमेतद्बाणमवष्टभ्यविधारयामइति ॥ २ ॥

विधारयंतेकतरेदेवाःएतद्विषयजातंप्रकाशयंतेकान्निमित्तीकृत्यपरमेश्वरःप्रजानांस्थितिंविषयप्रकाशंचकरोतीतियावत् । एषां धारणप्रकाशहेतूनांदेवानांमध्येकोवरिष्ठोतिशयेनवरः । पूर्वोक्तरीत्याप्राणेनभाव्यं ॥१॥ तत्कथमित्येवंपृष्टवतेतस्मैसहोवाच । एषआकाशाभिमानीदेवःहवैयस्त्वयाधारकःपृष्टःएवंवायुःभूतवायुर्देवतेत्यादि । अत्रोपलक्षणत्वेनपृथिवीचपृथिवीमात्रेत्यादिव क्ष्यमाणाःसर्वेमुख्यप्राणसहितास्तत्वदेवाग्राह्याः । तेषुचक्षुरादयःप्रकाशहेतवः । अन्येस्थितिहेतवइतिज्ञातव्यं । उक्तमात्रग्र

Sri Gargeshwari Digital Foundation

हणेकःपुनरेषांवरिष्ठइतिप्रश्ननुगुणःपरिहारःस्यात् । एतेषांप्राणस्यवरिष्ठत्वावधारणायआख्यायिकोच्यते । तेप्राकाश्याइत्यादि(ति) । तएतेधारकाःप्रकाशकाश्चदेवाःप्राकाश्याःप्रकाशवंतःउच्चैरितियावत् । अभिवदंति । कदाचिदन्योन्यंस्पर्धयैवाभ्यवदन् । किमिति । वयमेतद्बाणंशरीरंअवष्टभ्याश्रित्यविधारयामःप्रकाशयामश्चेति । अहमेवस्वातंत्र्येणदेहधारकोनत्वमितिधारकः । अहमेवस्वातंत्र्येणविषयप्रकाशकोनत्वमितिप्रकाशकइतियावत् ॥ २ ॥ तानेवमभिमन्यमानान्वरिष्ठःप्राणउवाच । किमिति । वयमेवधारकाःप्रकाशकाश्चेत्येवंविधंमोहंमिथ्याज्ञानमापद्यथ नप्राप्नुत । कुतोयंमोहः । यस्मादहमेवैतदे

तान्वरिष्ठःप्राणउवाच । मामोहमापद्यथाहमेवैतत्पंचधात्मानंविभज्यैतद्बाणमवष्टभ्यविधारयामीति । तेऽश्रद्दधानाबभूवुः । सोभिमानादूर्ध्वमुत्क्रमतइवतस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते ॥ ३ ॥

तस्मिन्शरीरेपंचधाप्राणादिरूपैरात्मानंप्रविभज्यप्रविभक्तंकृत्वाएतद्बाणमवष्टभ्यविधारयामिप्रकाशयामिचेति । तच्छ्रुत्वा तेदेवाअश्रद्दधानाअप्रत्ययवंतोबभूवुः । कुतएतदित्थमिति । समुख्यप्राणःतेषांप्रत्यायनाय । अभिमन्यतइत्यभिमानोदेहः । तस्मादूर्ध्वमुत्क्रमतइव । किंचिदूर्ध्वमुदक्रामत् । अथतस्मिन्प्राणउत्क्रामतिसतिइतरेसर्वएवाकाशादिदेवाःशरीरधारणादौ स्वस्थितौचासामार्थ्यादुत्क्रमंते । उदक्रमंत । अस्यचयाद्दच्छिकत्वपरिहारायपुनस्तस्मिन्प्राणेप्रतिष्ठमानेशरीरएवप्रतितिष्ठतिस

SGDF
Sri Gargeshwari Digital Foundation

तिसर्वेदेवाःप्रतिष्ठंतेशरीरेप्रत्यातिष्ठन् ॥ ३ ॥ तत्तत्रलोकेयथामधुमक्षिकामधुकरराजानंमधुकरप्रधानंमधुस्थानादुत्क्रामंतंअनु सर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठितेसर्वाएवप्रतिष्ठंते । एवंवागादयोदेवाइति । इत्थमन्वयव्यतिरेकाभ्यांप्राणस्यवरिष्ठत्वेऽवधा रितेप्रीतास्तेदेवाःत्वमेवसर्वदेवादिषुस्थित्वातन्नामातद्गुणक्रियादिप्रवर्तकइतिप्राणंस्तुन्वंतिअस्तुवन् । तदुच्यते । एषोग्निरित्या

तद्यथामधुमक्षिकामधुकरराजानमुत्क्रामंतंसर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रति ष्ठंते । एवंवाङ्मनश्चक्षुःश्रोत्रंचेतितेप्रीताःप्राणंस्तुन्वंत्येषोग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवा युरेषपृथिवीरयिर्देवःसदसच्चामृतंचयत् ॥ ४ ॥ अराइवरथनाभौप्राणेसर्वंप्रतिष्ठितं । ऋचोयजूं षिसामानियज्ञःक्षत्रंचब्रह्मच । प्रजापतिश्चरसिगर्भेत्वमेवप्रतिजायसे । तुभ्यंप्राणप्रजास्त्विमा यत्प्राणैःप्रतितिष्ठसि । देवानामसिवह्नितमःपितॄणांप्रथमास्वधा । ऋषीणांचरितंसत्यमथर्वां गिरसामपि ॥ ५ ॥

दि । एषप्राणएवाग्निःसन्तपति । एषएवसूर्योपिसन्तपतिमघवानेषएवेतिशेषः । पृथिवीरयिश्चयत्सदसन्मूर्तंअमृतंमुक्तजातं तदप्येषएव ॥ ४ ॥ कथमेतत्सर्वंप्राणएवेत्यतउक्तंवक्ष्यमाणंचविब्रियते । अराइति । तस्मात्सर्वंप्राणउच्यतइतिशेषः । परो क्षतयास्तुतोपरोक्षतयास्तूयते । प्रजापतिश्चरसीत्यादि । प्रजापतिःदक्षादिःत्वमेवगर्भेचरसि । गर्भस्थप्रेरकतयात्वमेवचरसि

SGDF
Sri Gargeshwari Digital Foundation

प्रतिजायसे । जनिक्रियांचत्वमेवकरोषि । हेप्राणइमादेवाद्याःप्रजाःतुभ्यंत्वदीयाः । कुतःयद्यस्मात्त्वंप्राणैश्चक्षुरादिभिःसहधारणादिकुर्वन्शरीरेप्रतितिष्ठसि । तस्मात् । नकेवलंतपनक्रियावानग्निःप्राणः । किंतूच्यते देवानामिति । त्वंदेवानांवह्नितमोयज्ञभागवाहकतमोसि । पितृणांप्रथमास्वधामुख्यस्वधावाहकोपित्वमेवासि । त्वमेवाथर्वांगिरसांऋषीणांचरितमाचारःसत्यवचनंचासि ॥५॥ इंद्रस्त्वमिति । मघवानित्युक्तविवरणं । तेजसायुक्तइतिशेषः । वायुरित्यस्यत्वमंतरिक्षेचरसीतिविवरणं । न

इंद्रस्त्वंप्राणतेजसारुद्रोसिपरिरक्षिता । त्वमंतरिक्षेचरसिसूर्यस्त्वंज्योतिषांपतिः । यदात्वमभिवर्षस्यथेमाःप्राणतेप्रजाः । आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति । व्रात्यस्त्वंप्राणैकऋषिरत्तविश्वस्यसत्पतिः । वयमद्यस्यदातारःपितात्वंमातरिश्वनः ॥ ६ ॥ यातेतनूर्वाचिप्रतिष्ठिताया श्रोत्रेयाचचक्षुषि । यामनसिसंततांशिवांतांकुरुमोत्क्रमीः । प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितं । मातेवपुत्रान्रक्षस्वश्रीश्चप्रज्ञांचविधेहिनइति ॥ ७ ॥ इतिद्वितीयप्रश्नः ॥ २ ॥

केवलंसूर्यस्यतापकत्वंप्राणाधीनं । किंतुज्योतिषांग्रहाणांपतित्वंच । पर्जन्यत्वविवरणं । यदेति । हेप्राणयदात्वंपर्जन्यरूपोभिवर्षसि । अथतदातेत्वदीयाःइमाःमानुषादिप्रजाःकामाययथेष्टंअन्नंभविष्यतीतिनिश्चित्यआनंदरूपाःआनंदवत्यस्तिष्ठंति । हेप्राण वायो व्रात्यःव्रतनिष्ठःएकर्षिःअथर्ववेदद्रष्टासि । विश्वस्यात्तायमादिश्चत्वमसि । सतांपतिःसंश्चासौपतिश्चेतिवासत्पतिःत्वमेव ।

वयंतवाद्यस्यभोज्यस्यदातारःत्वत्पूजकाइतियावत् । कुतः हेमातरिश्वमातरिश्वन्त्वंनोस्माकंपितासि । मातरिश्वनोभूतवायोः पितेतिवा ॥६॥ एवंस्तुत्वाप्रकृतंतूच्यते । यातइत्यादि । यातेत्वदीयातनूर्मूर्तिःवाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषियामनसिसंतता । सम्यग्व्याप्यवर्तमाना । एवमन्येषुतत्वेषुयाप्रतिष्ठितानांशिवांशांतांकुरु । मोत्क्रमीः । वागादिभ्यःतथोत्क्रमणंमाकुरु । वागादिषुप्राणस्यप्रतिष्ठितत्वंकुतः । यतएतत्सर्ववागादिकंप्राणस्यतववशेवर्ततेनत्वांविनाप्रवर्तितुंक्षमं । नकेवलमध्यात्मं । किंतुत्रिदिवेस्वर्गेयत्प्रतिष्ठितंअधिदैवादिकंचेतियावत् । वागादिषुस्थित्वात्वमस्मान्मातापुत्रानिवरक्षस्वपालय । श्रीःश्रियंप्रजाधारण

अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छ । भगवन्कुतएषप्राणोजायते । कथमायात्यस्मिन्शरीरे । आत्मानंवाप्रविभज्यकथंप्रतिष्ठते । केनोत्क्रमतेकथंबाह्यमभिधत्तेकथमध्यात्ममिति॥ १ ॥

शोभामितियावत् । प्रज्ञांप्रज्ञानंप्रकाशकत्वशक्तिंनोऽस्माकंविधेहिकुरु । इतिस्तुन्वंतीतिसंबंधः ॥७॥ इतिद्वितीयप्रश्नः॥२॥७॥ अथहैनंकौसल्यः । प्रागुक्तंपरमेश्वरोखिलजगज्जन्मादिकर्तेत्यादि तद्विवरणार्थोयमुत्तरोग्रंथः । भगवन्कुतःकस्मात्पुरुषादेव उक्तलक्षणःप्राणोजायते । समिथुनमुत्पादयतेरयिंचप्राणंचेत्युक्तमपिपरमेश्वराज्जन्मैवमाढ्यस्यकथंसंभवतीत्यभिप्रायः । अहमेवैतत्पंचधात्मानंप्रविभज्यैतद्वाणमवष्टभ्यविधारयामीत्युक्तं । तत्रकथंकस्मात्कारणात्अस्मिन्शरीरेप्राणआयातिप्रवर्तते । आत्मानंप्रविभज्यकथंप्रतिष्ठतेप्रतितिष्ठति । केते(प्र)विभागाःतैश्चकिंकुर्वन्कुत्रस्थानविशेषेतिष्ठतीतियावत् । तस्मिन्नुत्क्रांतेसर्वे

प्युत्क्रांताइत्युक्तं। तत्रकेनप्रविभागेनजीवादीनादायोत्क्रामति। प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितमित्युक्तं। तत्रकथंकेनरूपेणबाह्यमधिभूतादिकमभिधत्तेधारयति। कथंचाध्यात्ममभिधत्ते ॥ १ ॥ इत्येवंपृष्टवतेतस्मैसहोवाच। यस्मादेवंत्वमतिप्रश्नानतिशयितान्प्रष्टव्यार्थान्पृच्छसितस्मात्त्वंब्रह्मिष्ठोवेदविचारादिमानसि। नह्यन्यथैवंविधाःप्रश्नाःसंभवंतीति। यस्माद्ब्रह्मिष्ठोसितस्मादहंतेतुभ्यंउत्तरंब्रवीमीति। तंप्रशस्याद्यप्रश्नोत्तरमुच्यते। आत्मतइति। परमात्मतइत्यर्थः। एषएवंमहामहिमोपिप्रा

तस्मैसहोवाचातिप्रश्नान्पृच्छसिब्रह्मिष्ठोसीति। तस्मात्तेहंब्रवीमि। आत्मतएषप्राणोजायते। यथैषापुरुषेच्छायाएतस्मिन्नेतदाततं ॥ २ ॥ मनोकृतेनायात्यस्मिञ्छरीरे। यथासंम्राडेवाधिकृतान्विनियुंक्तएतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते ॥ ३ ॥

णआत्मतोजायते। तत्कथं। यथैषाछायापुरुषेशरीरेआतताअत्यंतंशरीराधीनावर्तते। एवमेवैतस्मिन्आत्मनिएतत्सर्वंप्राणादिकमाततं। प्राणादप्याढ्यतमत्वात्परमात्मनःततःप्राणस्यस्वजन्मसंभवत्येवेत्यभिप्रायः ॥ २ ॥ द्वितीयप्रश्नोत्तरंमनइति। स चायंप्राणोमनोकृतेनमनःकृतेनमनःपरंब्रह्मतत्कृतेनतन्निमित्तेनतत्प्रेरणयेतियावत्। आत्मनःप्रकृतस्यमनोनिमित्तेनेच्छयेतिवा आयात्यस्मिंछरीरइति। आत्मानंवेत्यादिप्रश्नोत्तरंयथासंम्राडित्यादि। अस्यैवंयोजना। यत्पृष्टंत्वयात्मानंवाप्रविभज्येति।

GDF
Sri Gargeshwari Digital Foundation

तत्रास्तिविवेक्तव्यं । द्विविधंतावत्प्राणादिपंचकं । एकंमुख्यप्राणाज्जातंततोतिरिक्तं । अपरंतदात्मकमिति । तत्रयथालोकेसंम्राट्सार्वभौमोधिकृतान्नियोगिनोविनियुंक्ते । कथंत्वमेतान्पाटलीपुत्रादीनधितिष्ठस्वतदाधिपत्येनतिष्ठेत्येकं । अन्यच्चत्वमेतान्कौशांबीप्रभृतीन्ग्रामानधितिष्ठस्वेति । एवमेषमुख्यप्राणइतरान्भिन्नानात्मनोजातत्वादुपचारेणात्मप्रविभागान्प्राणान्वायून्पृथक्पृथगेवस्थानेषुसन्निधत्ते । संस्थापयति । स्वयंचतत्तत्क्रियाप्रवर्तकतयातत्रप्राणादिपंचरूपोवतिष्ठतइत्याशयः ॥ ३ ॥ पृथक्पृथगित्युक्तंविव्रियते । पायूपस्थइत्यादि । पायुश्चोपस्थश्चपायूपस्थं । तत्रमलादेरपनयनादपानंवायुमात्मनोरूपेणापाने

पायूपस्थेऽपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठते । मध्येतुसमानः । एषह्येतद्धुतमन्नं समंनयतितस्मादेताःसप्तार्चिषोभवंति । हृदिह्येषआत्मा ॥ ४ ॥

नाधिष्ठितंसन्निधत्तइतिसंबंधः । चक्षुश्चश्रोत्रंचचक्षुःश्रोत्रं तस्मिन्मुखनासिकाभ्यांसह । मुखेनासिकायांचेतियावत् । प्राणः । स्वयंमुख्यएवश्वासादिप्रणयनात् प्राणनान्नास्वरूपेणवायुमधिष्ठायप्रतिष्ठते । प्रतितिष्ठति । समानस्तुसमानवायुमधिष्ठायमध्येप्राणापानयोर्नाभिदेशइतियावत् । प्रतितिष्ठति । सएषयस्मादेतद्धुतं भुक्तंअन्नंसमंयथाशरीरावयवंनयति । तेनसमानइतिशेषः । किंतेन । तस्मादन्नस्यसमीकरणाद्धेतोःसप्तार्चिषःसप्तज्ञानेंद्रियवृत्तयोभवंति । नन्वात्मैवविषयसंसर्गेणताननुभविष्यतिकिमिंद्रियवृत्तिभिरिति । मैवं । हृदिह्येषआत्माजीवःस्वरूपेणवर्तते । अतःकथंत

SGDF
Sri Gargeshwari Digital Foundation

स्याणोःविषयसंगतिःस्यादिति ॥ ४ ॥ व्यानस्यप्रवृत्तिंवक्तुंउच्यते । अत्रेत्यादि । अत्रशरीरेएतदेकशतंएकोत्तरशतंनाडीनां शिराणांभवति । तासांनाडीनांमध्येएकैकस्यांनाड्यांशतंशतंप्रतिशाखानाड्योभवंति । पुनस्तासांप्रतिशाखानाड्योभवंतीति वक्तव्यं । एवंचसंभूयप्रतिशरीरंतासांप्रतिशाखानाडीनांसहस्राणिद्वासप्ततिंजानीयात् । प्रतिशाखानाडीसहस्राणांद्वासप्तति मितिद्वितीयाषष्ठ्यर्थेयोजनीया । किंचातःआसुनाडीषुविविधंनयनात्व्यानोव्यानवायुमधिष्ठायचरति । अथोदानस्तुउदा

अत्रैतदेकशतंनाडीनां । तासांशतंशतमेकैकस्यांद्वासप्ततिंप्रतिशाखानाडीसहस्राण्यासुव्यान श्चरत्यथैकयोर्ध्वमुदानःपुण्येनपुण्यंलोकंनयतिपापेनपापमुभाभ्यामेवमनुष्यलोकं ॥५॥ आदित्यो हवैबाह्यःप्राणउदयत्येषह्येनंचाक्षुषंप्राणमनुगृह्णानःपृथिव्यांयादेवतासैषापुरुषस्यापानमवष्टभ्यांत रायदाकाशःससमानोवायुर्व्यानस्तेजोहवाउदानः तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्मनसि संपद्यमानैः ॥ ६ ॥

नवायुमधिष्ठायएकयानाड्यासुषुम्नयोर्ध्वगतिश्चरति । सचतत्रचरन्पुण्येनजीवकृतंपुण्यंनिमित्तीकृत्यपुण्यंस्वर्गादिलोकंनय ति । एवंज्ञानेनमोक्षमितिचद्रष्टव्यं । अतएवोर्ध्वनयनादुदानःपापेनपापंनरकादिकंदुःखबहुलंलोकंनयति । उभाभ्यांसमप्र धानाभ्यांपुण्यपापाभ्यांसमदुःखसुखंमनुष्यलोकंनयतीति ॥ ५ ॥ कथंबाह्यमित्यादिप्रश्नद्वयंपरिह्रियते । आदित्यइत्यादि ।

मुख्यप्राणएवहिप्राणनामाबाह्योबहिर्भवःआदित्येस्थितःतन्नामाउदयते । उद्गच्छति । एषआदित्यस्थःप्राणएवैनंचाक्षुषंचक्षुषिभवंप्राणवायुंअनुगृह्णानःवर्तते । एतेनमुख्यप्राणःप्राणनाम्नारूपेणबहिरादित्यमभिधत्ते । अध्यात्मंचाधिष्ठानभूतेनादित्येनसहैवचक्षुषिस्थित्वाचक्षुस्तदभिमानिनंचप्राणवायुमभिधत्तइत्युक्तंभवति । एवमुत्तरत्रापिज्ञातव्यं । बहिःपृथिव्यांयाधारिकाअपानाख्यादेवतासैषापुरुषस्यापानंदेहेवर्तमानंअपानवायुमवष्टभ्यधृत्वाअंतराशरीरांतर्वर्तते । अंतराद्यावापृथिव्योर्मध्येयदाकाशोयआकाशःआकाशधारकःसमानः । सोध्यात्मंसमानःसमानवायुंधत्ते । योबहिर्वायुधारकोव्यानःसएवांतर्व्यानोव्या

यच्चितस्तेनैषप्राणमायाति । प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयति । यएवंविद्वान्प्राणंवेदनहास्यप्रजाहीयतेऽमृतोभवति । तदेषश्लोकः । उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा । अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतमश्नतइति ॥७॥ इतितृतीयःप्रश्नः ॥३॥

नवायुधारकः । बहिस्तेजोधारकोयउदानःसउदानोउदानवायुंधत्तइत्येतत्प्रसिद्धं । कथमिति । यस्मात्तेजोधिष्ठातोदानस्तेनाधिष्ठानेनतेजसासहैवांतरुदानंदधत्प्राणिनांजीवनहेतुर्वर्तते । तस्मादेवहियःपुरुषःउपशांततेजाभवति । सतेजसोपशमेनोदानस्याप्यागमनमनुमायमनसिसंपद्यमानैर्लीयमानैरिंद्रियैस्सहपुनर्भवंजन्मांतरंमरणमितियावत् । प्राप्स्यतीत्यनुमीयतेलोकइतियोज्यं ॥ ६ ॥ संगतिविशेषलाभात्केनोत्क्रमतइतिप्रश्नस्योत्तरमिदानीमुच्यते । यच्चितइति । एषपुरुषोयच्चितोमरण

कालेयद्विषयचित्तोभवति । तेनतद्विषयचित्तेनसहप्राणंमुख्यमायातितत्समीपंप्राप्नोति । प्राणस्तुतेजसोदानेनयुक्तःपरमात्मनासहजीवेनयथासंकल्पितंतेनजीवेनमरणकालेयादृशःसंकल्पितःस्मृतःतथाविधंलोकंशरीरंनयतिप्रापयतीति । अतएव यच्चितइत्युक्तं । स्वाभिप्रेतमितिवा । अनेनोदानरूपेणोत्क्रमणमित्युक्तंभवति । एवंभूतप्राणविज्ञानस्यफलमुच्यते । यएवमिति । योविद्वानेवमुक्तलक्षणंप्राणंवेदविजानातिनास्यविदुषःप्रजाविहीयते । अविच्छिन्नसंतानोभवतीत्यैहिकं । परत्रचामृतो मुक्तोभवति । तदेषश्लोकः । प्राणस्योत्पत्तिंपरमात्मनाआयतिंप्रवर्तनंशरीरेतदिच्छया स्थानंपायूपस्थादि । पंचधाप्राणादि

अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ । भगवन्नेतस्मिन्पुरुषेकानिस्वपंतिकान्यस्मिन्जाग्रति । कतरए षदेवःस्वप्नान्पश्यति । कस्यैतत्सुखंभवतिकस्मिन्सर्वेसंप्रतिष्ठिताभवंतीति ॥ १ ॥

रूपेणविभुत्वंविविधभवनंस्वाम्यंच । तथाध्यात्मंधारकत्वंचशब्देनबाह्यधारकत्वमुत्क्रमणंचेत्येतद्विज्ञायविशेषेणज्ञात्वामृतंमोक्षमश्नुतेप्राप्नोति ॥ ७ ॥ इतितृतीयप्रश्नप्रतिवचनं ॥ ३ ॥ अथहैनंसौर्यायणी । उक्तंप्राणादेरखिलस्यापिजगतोभगवदधीनत्वं । तन्नकेवलंजाग्रदवस्थायांकिंनामस्वप्नसुषुप्त्योरपीतिदर्शयितुमुत्तरोग्रंथः । भगवन्नेतस्मिन्पुरुषेशरीरिणिस्वपतिसतिकानि दैवानिस्वपंति । स्वव्यापारादुपरमंते । भाव्यंहिकेषांचिद्व्यापारोपरमेण । अन्यथास्वापस्यैवासंभवात् । कानिदैवान्यस्मिन्पुरुषेस्वपतिसतिजाग्रति । स्वव्यापारंकुर्वंति । सर्वेषामुपरमेशरीरावस्थानासंभवात् । स्वापोद्विविधः । स्वप्नसुषुप्तिभेदात् ।

SGDF
Sri Gargeshwara Digital Foundation

तत्रस्वप्नेयएषदेवःस्वप्नान्स्वप्नस्थान्पदार्थान्पश्यतिसकतरः । सर्वेंद्रियाणामुपरतत्वात्केनेंद्रियदेवेनजीवःस्वाप्नान्पदार्थाननुभवतीत्यभिप्रायः । सुषुप्तौचयत्सुखंभवतितत्कस्य तदोपरतकरणस्यजीवस्यविषयसंसर्गाद्यभावेनकथंसुखानुभवोघटतइत्याशयः । एतेचस्वपंतोजाग्रतःस्वप्नाद्यवस्थावांश्च । नतावत्स्वतंत्राः । बहूनांस्वातंत्र्यायोगात् । नचजीवाधीनाः । क्वचिदतद्वशत्वस्यापिदर्शनात् । नचमुख्यप्राणाधीनाः । तस्यापिजीवत्वेनानवस्थितेरसंभवाच्च । अनःपराधीनाएतेसर्वेकस्मिन्संप्रतिष्ठिताभवंति । परमेश्वरश्चेदाश्रयःतत्कुतइत्यभिप्रायः ॥ १ ॥ एवंपृष्टवतेसहोवाच । यथेत्यादि । हेगार्ग्ययथार्कस्यास्तमदर्शनं

तस्मैसहोवाच । यथागार्ग्यमरीचयोर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलएकीभवंतिताःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवति । तेनतर्ह्येषपुरुषोनशृणोतिनपश्यतिनजिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षते ॥ २ ॥

गच्छतःसर्वाएवमरीचयःसर्वेपिरश्मयःएतस्मिन्दृश्यमानेतेजोमंडलेएकीभवंति । तत्रैकीभूताइवदृश्यंते । प्रकाशादिव्यापारादुपरमंतइतियावत् । ताःपुनस्तेतुरश्मयोर्कस्यपुनरुदयतःसतःप्रचरंति । तस्मान्मंडलान्निर्गत्यलोकेप्रचरंतीवदृश्यंते । स्वव्यापारंकुर्वंतीतियावत् । एवंखल्वेतत्सर्वंशरीरितदिंद्रियदेवताजातंचपरेदेवेविष्णौस्वप्नावस्थायांमनसिस्थितेसुषुप्तौहृदयाकाशस्थेएकीभवंति । जागरेतुप्रचरंति । अनेनस्वप्नेमनोव्यतिरिक्तानामेवोपरमः । सुषुप्तौतुतस्यापीतिसूचितं । यतएवं

SGDF
Sri Gargeshwari Digital Foundation

तेनकारणेनतर्हितदास्वापेएषपुरुषोजीवोनशृणोतीत्यादि । नेयायतेनगच्छति । स्वप्नविवक्षयाचैतत् । सुषुप्तौतुनमनुत इत्याद्यपिद्रष्टव्यं । यतएवंजीवःस्वापेपरंदेवंप्राप्नोति । अतएवहितदास्वपितीत्याचक्षतेविद्वांसः । स्वंस्वतंत्रंदेवमप्येती तिकृत्वेति ॥ २ ॥ कानिजाग्रतीत्यस्योत्तरं । प्राणाग्नयइति । स्वापकालेएतस्मिन्पुरेशरीरेप्राणाःप्राणादिमुख्यप्राणरूपा ण्येवाग्नयप्राणाग्नयएवजाग्रतिशरीरधारणादिस्वव्यापारंकुर्वंति । अग्नयइत्युपलक्षणं । ऋत्विग्भावस्यापिवक्ष्यमाणत्वात् । कथंतेषामग्न्यादित्वमित्यतउच्यते । गार्हपत्यइत्यादि । तेषांप्राणानामेषोपानोगार्हपत्यः । पश्चिमत्वसाम्यात् । व्या

प्राणाग्नयएवैतस्मिन्पुरेजाग्रतिगार्हपत्योहवाएषोऽपानोव्यानोन्वाहार्यपचनोयद्गार्हपत्यात्प्रणी यते । प्रणयनादाहवनीयःप्राणोयदुच्छ्वासनिःश्वासावेतावाहुतीसमंनयतिससमानोमनोहवाव यजमानइष्टंफलमेवोदानः । सएनंयजमानमहरहर्ब्रह्मगमयति ॥ ३ ॥

नोन्वाहार्यपचनः । दक्षिणाग्निः । होमांगत्वसाम्यात् । यद्यस्माद्गार्हपत्यादाहवनीयःप्रणीयते । प्राणोप्यपानात् । तस्मा त्प्रणयनात्प्रणयनसाम्यात्प्राणआहवनीयः । यद्यस्माद्वावेतावुच्छ्वासनिश्वासौतेऐतावाहुतीसमंयथाकालंनयतितस्मादाहुत्यो स्समंनयनसाम्यात्समानः । सोध्वर्युरितियावत् । तत्रमननान्मनोजीवोयजमानःपराधीनफलत्वसाम्यादित्युत्तरार्थवचनं । अन्यथापूर्वंप्राणादीनामेवप्रकृतत्वेनजीवस्ययजमानत्वोक्तिरयुक्तास्यात् । अतउत्तरवाक्येउदानस्ययजमानफलप्रतिपादकत्वे

नोद्गातृत्वार्थंजीवस्ययजमानत्वोक्तिरुपपन्नेतिभावः । उदानःइष्टफलंयज्ञफलंप्रतिपादकःउद्गातेतियावत् । फलप्रतिपादकत्व साम्यात् । कथमुदानस्यफलप्रतिपादकत्वं । सउदानोह्येनंयजमानंजीवंअहरहःप्रतिदिनंसुप्तावितियावत् । ब्रह्मसुषुप्नागतं गमयतिप्रापयतीतियएवंवेदतेनैवमिष्टंभवति । नित्यंब्रह्मप्राप्तिफलंचतस्यभवतीतिज्ञापनायेदमुक्तं ॥ ३ ॥ यतएवंमनोव्यति रिक्तानामेवोपरमस्स्वप्नेतस्माज्जीवस्यमनसास्वप्नदर्शनंयुक्तमितिभावेनकतरएषदेवस्स्वप्नान्पश्यतीतितृतीयप्रश्नस्यपरिहारउच्य

अत्रैषदेवःस्वप्नेमहिमानमनुभवतियदृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमेवार्थमनुशृणोतिदेशदिगंतरेच प्रत्यनुभूतंपुनःपुनःप्रत्यनुभवति । दृष्टंचादृष्टंचश्रुतंचाश्रुतंचानुभूतंचाननुभूतंचसच्चासच्चसर्वंप श्यतिसर्वःपश्यति ॥ सयदातेजसाभिभूतोभवत्यत्रैषदेवःस्वप्नान्नपश्यति ॥ अथयदेतस्मिञ्छरी रेसुखंभवति ॥ ४ ॥

ते । अत्रेत्यादि । अत्रैतस्यामवस्थायांमनोव्यतिरिक्तेंद्रियोपरमइतियावत् । एषदेवोमनोनामातेनानुगृहीतोजीवइतियावत् । स्वप्नेमहिमानमात्मनोमहत्वमन्यच्चानुभवति । तत्रचयमर्थंपश्यतितंप्राक्दृष्टमेवानुपश्यति । यःप्राक्श्रुतःतंश्रुतमेवार्थंशब्दंस्व प्नेनुशृणोति । एवमन्यदप्यनुभूतमेवानुभवति । नाननुभूतं किमस्मिन्नेवदेशेनुभूतमनुभवति । न किंतुदेशांतरेदिगंतरेचय त्प्रत्यनुभूतंपुनःपुनरनुभूतंतदेवस्वप्नेपुनःपुनःप्रत्यनुभवति । भ्रांत्यातदेवेदमितिप्रत्यभिजानाति । नाप्यस्मिन्नेवजन्मन्यनुभू

Sri Gargeshwari Digital Foundation

तमनुभवतीतिनियमःकिंत्वस्मिन्जन्मनिदृष्टमदृष्टंचजन्मांतरेदृष्टं । एवमुत्तरत्रापिअनुभूतंअननुभूतंइंद्रियांतरेण । सच्चतदानींअसच्चनिवृत्तंचेत्येवंसर्वंपश्यति । जानाति । स्वयंचसर्वःनानाकर्मभिःनरवानराद्यनेकप्रकारस्सन्तत्पश्यति कस्यैतत्सुखं भवतीतिचतुर्थप्रश्नंपरिहर्तुमुच्यते । सयदेत्यादि । एवंस्वप्नेवर्तमानस्सजीवोयदातेजसाभगवदीयेनाभिभूतःआवृतोभव

सयथासोम्यवयांसिवासोवृक्षंसंप्रतिष्ठंते । एवंहवैतत्सर्वंपरेआत्मनिसंप्रतिष्ठते । पृथिवीचपृथिवीमात्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्चवायुमात्राचाकाशश्चाकाशमात्राचचक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचघ्राणंचघ्रातव्यंचरसनंचरसयितव्यंचत्वक्चस्पर्शयितव्यंचवाक्चवक्तव्यंचहस्तौचदातव्यंचपादौचगंतव्यंचपायुश्चविसर्जयितव्यंचोपस्थश्चानंदयितव्यंचमनश्चमंतव्यंचबुद्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंचचित्तंचचेतयितव्यंचतेजश्चविद्योतयितव्यंचप्राणश्चविधारयितव्यंच ॥ ५ ॥

तिभगवंतंप्रविशतीतियावत् । अत्रैतस्यांसुषुप्तिसंज्ञायामवस्थायांएषदेवोमनःस्वप्नान्नपश्यति । मनसोप्युपरतत्वात् नजीवस्स्वप्नान्पश्यतीतियावत् । यस्मादेवंपरमेश्वरतेजसाभिभूतोभवत्यथतस्मात्तत्सन्निधानसामर्थ्योद्भूतं । यत्सुखंतदेतस्मिन्शरीरेभगवच्छरीरवत् । ज्ञानात्मकत्वेनतत्साद्दश्ययुक्तेजीवेभवतीतिनकाचिदनुपपत्तिरिति ॥ ४ ॥ कस्मिन्सर्वेप्रतिष्ठि

SGDF
Sri Gargeshwari Digital Foundation

ताभवंतीत्यंतिमप्रश्नपरिहारस्सदृष्टांतउच्यते । सयथेत्यादि । सोम्यसोमार्हसदृष्टांतोयथावयांसिपक्षिणोवासोयत्रात्मनांतंवृक्षंसंप्रतिष्ठंते । अभिगच्छंतितमाश्रित्यतिष्ठंतिच । एवंखल्वेतत्सर्वंपृथिव्यादितत्त्वजातंपरेआत्मनिविष्णौसंप्रतिष्ठते । तदाधारमेववर्ततइति । अत्रपृथिवीत्यादिनापंचमहाभूतान्युच्यंते । पृथिवीमात्राचेत्यादिनागंधादिपंचतन्मात्राः । चक्षुश्चेत्यादिनादशेंद्रियाणि । द्रष्टव्यंचेत्यादिनारूपादितद्विषयाः । मनइत्यादिनांऽतःकरणपंचकं । मंतव्यंचेत्यादिनातद्विषयाः । तेजश्श

एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयितामंताबोद्धाकर्ताविज्ञानात्मापुरुषः । सयोहवैतदच्छायमशरीरमलोहितंशुभ्रमक्षरंवेदयतेयस्तुसोम्यससर्वज्ञःसर्वंभवति । तदेषश्लोकः । विज्ञानात्मासहदेवैश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्र । तदेतदक्षरंवेदयतेयस्तुसोम्यससर्वज्ञःसर्वमेवाविवेशेति ॥ ६ ॥ इतिचतुर्थःप्रश्नः ॥ ४ ॥

ब्देनचेतनागृह्यते । सर्वस्यापिसंग्रहः । प्राणोमुख्यप्राणोधारकःतेनविधारयितव्यंचपृथिव्यादिकंसर्वं ॥ ५ ॥ कथंसर्वस्यपरात्मशब्दितविष्णवधीनत्वमित्यतउच्यते । एषहीति । चक्षुरादीनामेतेषामेषहिदर्शनादिशक्तिप्रदः । स्वयंचविज्ञानात्माविज्ञानस्वरूपःसर्वज्ञतियावत् । पुरुषःपूर्णत्वादतश्चोपपन्नंतस्यसर्वाश्रयत्वमिति । तस्यविज्ञानात्मनोवेदनस्यफलमुच्यते । सयइति । सविज्ञानात्मापुरुषोयोयादृशलक्षणःएतमेवंविधंअच्छायमविद्यारहितं । अतएवाशरीरंतस्मादेवालोहितंलोहितत्वादिरूपर

SGDF
Sri Gargeshwari Digital Foundation

हितंशुभ्रंशुद्धंप्राकृतरूपाद्यभावेपिअप्राकृतशुभ्रादिरूपयुक्तंवा अतएवाक्षरं । हेसोम्ययोवेदयतेविजानातिससर्वज्ञःसर्वप्रधान स्यसर्वकारणस्यचपरिज्ञानात्सर्वज्ञइवतत्सदृशत्वात् सर्वस्यसर्वज्ञएववासर्वस्यापिकर्मादेः । ज्ञानस्यफलंपरमात्मज्ञानंप्राप्तमनेने तिवा । ज्ञानीस्तूयते । सर्वंभवतिसर्वपरिपूर्णपरंब्रह्मतद्भवतितद्भूतइव । तत्प्रविशतीतियावत् । तदेषश्लोकः । विज्ञा नात्माविज्ञानस्वरूपोजीवः । शरीरेसुखंभवतीतिद्युक्तं । प्राणाश्चक्षुरादयःतद्विषयाश्चरूपादयःभूतानिपृथिव्यादीनित न्मात्राश्चसर्वैर्देवैरभिमानिभिःसूर्याद्यैःसहैवयत्रयस्मिन्नक्षरेब्रह्मणिसंप्रतिष्ठंते । तदेतदक्षरंवेदयतेविजानातियःपुरुषःसोम्येति

अथहैनंशैब्यःसत्यकामःपप्रच्छ । सयोहवैतद्भगवन्मनुष्येषुप्रायणांतमोंकारमभिध्यायीतकतमं वावसतेनलोकंजयतीति । तस्मैसहोवाच । एतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारः । तस्मा द्विद्वानेतेनैवायतेनैकतरमन्वेति ॥ १ ॥

कस्यचित्संबुद्धिः । सउक्तप्रकारेणसर्वज्ञःसर्वपरंब्रह्मआविवेशैवाविष्टएवध्रुवमाविशत्येवेति । इतिचतुर्थप्रश्नप्रतिवचनं ॥७॥४॥ अथहैनंशैब्यः । एवमुक्तलक्षणंपरंब्रह्मयेनमंत्रेणोपासितव्यं । उपासितंचयत्फलंप्रयच्छति । तदिदानींवक्तुमयमुत्तरोग्रंथः । भगवन्नेतद्देहेषुमनुष्येषुसयोयःकश्चित्प्रायणांतंप्रयाणपर्यंतंयावच्छरीरादुत्क्रमणंतावदितियावत् । ओंकारंओमित्याक्रियमाणं परमात्मानंअभिध्यायीतसर्वदाचिंतयेत् । ओमित्यनेनमंत्रेणेत्यभिप्रायः । सपुरुषःतेनकतमंलोकंजयतिप्राप्नोतीतिपृष्टवतेतस्मै

सहोवाच । यदोंकारः । ओमित्याक्रियमाणंवस्तु । तदेतत्परंचापरंचब्रह्म । यस्मात्प्रणवोमुख्यतःपरमात्मप्रतिपादकः । तत्प्रतिम
त्वेनामुख्यतःविरिंचप्रतिपादकश्च । तस्माद्विद्वान्प्रणवेनोपासकएतेनैवोपासनाख्येनायनेनगमनसाधनेनपरापरब्रह्मणोरेकतर
मन्वेतिप्राप्नोति ॥ १ ॥ किंप्रणवोपासनमात्रेणैकतरमन्वेति । न किंतुयथावज्ज्ञात्वोपासनेनैवेत्युच्यते । सइत्यादि । अकारोकारम
काराख्यांशत्रययुक्तोहिप्रणवःसउपासकोयद्येकमात्रंएकमात्रावाचिकायस्यतंपरमात्मानंप्रणवेनाभिध्यायीत । एकामेवमात्रां

**सयद्येकमात्रमभिध्यायीतसतेनैवसंवेदितस्तूर्णमेवजगत्यामभिसंपद्यते । तमृचोमनुष्यलोकमुप
नयंते । सतत्रतपसाब्रह्मचर्येणश्रद्धयासंपन्नोमहिमानमनुभवति । अथयदिद्विमात्रेणमनसिसं
पद्यतसोंतरिक्षंयजुर्भिरुन्नीयतेसोमलोकंससोमलोकेविभूतिमनुभूयपुनरावर्तते । यःपुनरेतंत्रि
मात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतसतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविनिर्मुच्य
तेएवंहवैसपाप्मनाविनिर्मुक्तःससामभिरुन्नीयतेब्रह्मलोकं । सएतस्माज्जीवघनात्परात्परंपुरिश
यंपुरुषमीक्षते ॥ २ ॥**

सम्यग्विदित्वाइतरे(मात्रेअ)अविज्ञायेतियावत् । तर्हिसउपासकःतेनैवध्यानेनपरमात्मनासंवेदितःएहीतिसंबोधितइवदेहपा
तानंतरंक्षिप्रमेवजगत्यांपृथिव्यांअभिसंपद्यते । प्राप्नोतिजन्मेतिशेषः । कथंकीदृशंजन्मेतितमुपासकंऋचःऋग्वेदाभिमानिन्यो
देवताःपृथिव्यांमनुष्यलोकंमनुष्यशरीरंद्विजाग्र्यलक्षणंउपनयंतेप्रापयंति । सचतत्रजन्मनितपआदिसंपन्नःतत्फलरूपमहिमा

SGDF
Sri Gargeshwari Digital Foundation

नमनुभवति । अथयदिद्विमात्रेणद्वेमात्रेवार्चिकेयस्यतेनपरमात्मनामनसिसंपद्यतेसंगतोभवति । तिसृषुप्रणवमात्रासुद्वेमात्रेस म्यग्ज्ञात्वाअन्यामविज्ञायपरमात्मानंचिंतयतीतियावत् । तर्हिसउपासकःयजुर्भिःयजुर्वेदाभिमानिदेवताभिःअंतरिक्षंअंतरि क्षस्थंसोमलोकंउन्नीयते । उन्नीतश्चतत्रसोमलोकेविभूतिमैश्वर्यंअनुभूयपुनरावर्तते । ततश्चयतेयतएवंतस्माद्यस्तुपुरुषःएतंपरं पुरुषंत्रिमात्रेणतिस्रोमात्राअपिसम्यग्विदित्वेतियावत् । ओमित्यनेनैवाक्षरेणाभिध्यायीतसध्यातापरमेश्वरमपरोक्षीकृत्यतेजो रूपेसूर्येसंपन्नः । तंप्राप्नोतिसूर्यप्राप्यचासौयथापादोदरःसर्पःत्वचाजीर्णयाविनिर्मुच्यते । एवंखलुसध्यानीपाप्मनाप्रारब्धेन

तदेतौश्लोकौभवतः । तिस्रोमात्रामृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताः । क्रियासु बाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्तासुनकंपतेज्ञः । ऋग्भिरेतंयजुर्भिरंतरिक्षंसामभिर्यत्तत्कव योवेदयंते । तमोंकारेणैवायनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरंचेति ॥ ३ ॥ इतिपं चमःप्रश्नः ॥ ५ ॥

विनिर्मुक्तोभवति । विधूतपापश्चससामभिःसामवेदाभिमानिदेवताभिःब्रह्मलोकंसत्याख्यंउन्नीयते । तत्रचएतस्मात्सत्यलो काधिपतेर्जीवघनाज्जीवसारात्सकलजीवोत्तमाद्धिरिंचात्तदुपदेशेनेनियावत् । परात्परंउत्तमोत्तमंपुरिशयंसकलशरीरेषुशयितं पुरुषंपूर्णवासुदेवंईक्षते । पुनरभिवृद्धज्ञानोभवतीति । अत्रपुरुषमीक्षित्वाचतंप्राप्नोतीत्यपिग्राह्यं । यथोक्तंभाष्ये ॥ २ ॥ तत्रो क्तेर्थेएतौवक्ष्यमाणौश्लोकौसंमतित्वेनभवतः । तिस्रोकाराद्याःप्रणवमात्राःअनविप्रयुक्ताअन्योन्यमसंबद्धाःएकैकशोयेनज्ञा

SGDF
Sri Gargeshwari Digital Foundation

ताःविप्रयुक्तानभवंतीत्यविप्रयुक्ताःनअविप्रयुक्ताः अनविप्रयुक्ताःविप्रयुक्ताएवेत्यर्थः। अन्योन्यसक्ताःपरस्परंयुग्मतयासंबद्धाः येकेवाद्वेद्वेज्ञात्वेतियावत्। बाह्याभ्यंतरमध्यमासुतारमंद्रमध्यरूपासुउच्चारणक्रियासुप्रयुक्ताःउच्चारितामृत्युमत्योभवंति। एकैकामेवद्वेद्वेत्वायेकेचित्सम्यज्ज्ञात्वाशेषमज्ञात्वाउच्चैर्वानीचैर्वामध्यमानेनवाउच्चारिताःप्रणवमात्राःनापुनरावृत्तिफलंप्रापयंतीत्यर्थः।तासुसम्यक्प्रयुक्तासुतिस्रोपिसम्यज्ज्ञात्वोच्चारितासुसतीषुज्ञोज्ञानीनकंपते। नच्यवते। नपुनरावृत्तिफलंप्राप्नोतीति।एतदर्थविवरणार्थोद्वितीयोमंत्रः। एकमात्राज्ञानपूर्वकोपासनात्ऋग्भिरेनंपृथिव्याख्यंमानुषंलोकंउपासकोनीयते। द्विमात्राज्ञानपूर्व

अथहैनंसुकेशाभारद्वाजःपप्रच्छ । भगवन्हिरण्यनाभःकौसल्योराजपुत्रोमामुपेत्यैनंप्रश्नमपृच्छत । षोडशकलंभारद्वाजपुरुषंवेत्थतंमह्यंब्रवीहीति । तमहंकुमारमब्रुवंनाहमिमंवेदयद्यहमिममवेदिष्यंकथंतेनावक्ष्यमिति। समूलोवाएषपरिशुष्यतियोनृतमभिवदतितस्मान्नार्हाम्यनृतंवक्तुं। सतूष्णींरथमारुह्यप्रवव्राज । तंत्वापृच्छामिकासौपुरुषइति ॥ १ ॥

कोपासनाद्यजुर्भिरंतरिक्षंतत्रस्थसोमलोकंनीयते । यत्तत्कवयोज्ञानिनोवेदयंतेजानंतिज्ञापयंतिच। परात्परंब्रह्मयत्तच्छांतंसुखोत्कर्षसीमाभूमिरूपमजरंजरादिवर्जितंपरंसर्वोत्तमंब्रह्मओंकारेणैवायनेनअयनसाधनमोंकारंमात्रात्रयात्मकंसम्यज्ज्ञात्वाचेतियावत्। सामभिरन्वेतीति ॥३॥ इतिपंचमप्रश्नप्रतिवचनं ॥५॥ छ ॥ अथहैनंसुकेशा ॥ प्राक्प्राणादीनांशरीरिणश्चजाग्रत्स्वप्नसुषुप्तिषुपरमेश्वराधीनत्वमभिहितंनतुमोक्षे। अतःसिंहावलोकनन्यायेनमुक्तावपितेषांभगवदधीनत्वप्रकाशनार्थंउत्तरोग्रंथः । प्रष्ट

SGDF
Sri Gargeshwari Digital Foundation

व्यार्थेऽतिशयितबुभुत्सांस्वस्यज्ञापयितुंपूर्ववृत्तांतकथनं। भगवन्हिरण्यनाभोनामतः । कोसलायांभवःकौसल्यःकस्यचिद्राज्ञः पुत्रःमामुपेत्यप्राप्यैनंवक्ष्यमाणंप्रश्नंप्रष्टव्यार्थमपृच्छत। हेभारद्वाजषोडशकलोनामकश्चित्पुरुषोस्तीतिसामान्यतोमयाश्रुतं। तंषोडशकलंपुरुषंत्वंवेत्थविशेषतोजानासिकिं। कोसौपुरुषः। क्वचास्ते। कानामषोडशकलाः।कथंचैतस्यषोडशकलत्वमित्यादि । यदि चजानासितर्हिमह्यंब्रूहीति। एवंपृष्टवंतंकुमारंपूर्ववयसिवर्तमानंहिरण्यनाभंअहमब्रुवं । अहमिमंत्वयापृष्टंषोडशकलंपुरुषंनवेदन जानामि। कुतःयद्यहमिमंपुरुषंअवेदिष्यंविदितवानभविष्यंतर्हिकथंकस्माद्योग्यायतेतुभ्यंनावक्ष्यंइत्यतोनाहमिमंवेद। किंचयः

तस्मैसहोवाच । इहैवांतःशरीरेसोम्यसपुरुषोयस्मिन्नेताःषोडशकलाःप्रभवंतीति । सईक्षांचक्रे कस्मिन्वहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति । सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुनामच ॥२॥

पुरुषःअनृतमभिवदतिसएषःसमूलःपरिशुष्यतिवैसर्वात्मनागतसारोभवति। तेनार्जितंसमस्तमपिसुकृतंनश्यतीतियावत्। यतएवंतस्मात्ज्ञात्वापिनजानामीत्यनृतंवक्तुंदोषज्ञोहंनार्हामि। नार्होभवामीत्येवमनेकप्रकारेणप्रत्यायितःसलज्जयातूष्णींकिमप्यवदन्रथमारुह्यप्रवव्राज।यथागतंगतवान्। एवंतदाप्रभृतिज्ञातव्यतयाममहृदिवर्तमानंपुरुषंत्वांपृच्छामि।किमिति।असौषोडशकलः पुरुषःक्वास्तेकाश्चताःकलाःकथंचासौषोडशकलइत्यादि॥१॥ एवंपृष्टवतेतस्मैसहोवाच । वक्ष्यमाणलक्षणैःविष्णुरेवासौपुरुषइति

सेत्स्यतीत्यभिप्रायेणशिष्टस्यपरिहारउच्यते। इहैवेति । हेसोम्ययस्मिन्पुरुषेएताःवक्ष्यमाणाःप्राणाद्याःषोडशसंख्याकाःकलाःस
जीवस्यशरीरस्यभागाःप्रभवंतियस्मादुत्पद्यंते यस्मिंश्चप्रतिष्ठिताःमुक्तास्तत्योयमाश्रित्यवर्तते। अनेनषोडशकलत्वंचैतस्यकथमि
तिपरिहृतंभवति । सपुरुषःइहैवशरीरेशरीरस्यैवांतरास्ते। नावश्यंतद्दर्शनायदूरंगंतव्यमित्यभिप्रायः। यस्मिन्नेताःषोडशकलाःप्र
भवंतीत्युक्तंप्रपंच्यतेसइत्यादि । सपुरुषःकल्पादौकलाःसृजामीतिईक्षांचक्रेचिंतितवान् । पुनश्चकस्मिन्पुरुषेशरीरादुत्क्रांतेऽ
हमुत्क्रांतोभविष्यामि । कस्मिन्वातत्रप्रतिष्ठितेऽहमपिप्रतिष्ठास्यामीतिप्रतिष्ठितोभविष्यामिकोनुमद्भशीकरणक्षमभक्तिज्ञाना
दिसंपन्नो यंनिमित्तीकृत्याहंकलाःसृजामीत्येवमीक्षित्वातादृशःप्राणएवेतिनिश्चित्यसपुरुषःप्राणंजीवकलाभिमानिनंअसृजत।
प्राणात्तंप्राणंनिमित्तीकृत्यश्रद्धांजीवस्यास्तिक्यनिष्ठाभिमानिनींभारतींअसृजत । ततःखंवायुःज्योतिरापःपृथिवीत्येतानिशरी
रोपादानभूतानिभूतानितदभिमानिनोविघ्नेशाद्याःदेवाइंद्रियंचक्षुरादिप्रवृत्तौउपकरणंसूर्यादिदेवाःमनःप्रधानकरणंतद्देवाःवीं
द्रशेषकामानिरुद्धाः । अन्नंतत्स्थितिकारणंतन्मानीसोमः । तस्माच्चान्नात्अन्नंनिमित्तीकृत्यवीर्यंशरीरहेतुभूतंतद्देवतावरुणः ।
तपोजीवस्यज्ञानादिहेतुतयासुखसाधनंतदभिमानीवह्निःमंत्राऋगादिवेदाःसाक्षाज्ज्ञानादिहेतवःतद्देवतास्वाहा। कर्मपुण्यापुण्य
लक्षणं । सुखादिनिमित्तं । तदभिमानीपुष्करः । लोकाःगोलकाः । इंद्रियाश्रयभूताः । तद्देवःपर्जन्यः । नामदेवदत्तादिकं ।
तन्मानिनीउषाइत्येताःकलाःपुरुषेणसृष्टाइतिग्राह्यं । अत्रसप्राणमसृजत । प्राणाच्छ्रद्धामित्यादौअन्नाद्वीर्यमितिमध्ये । लोके
षुसृष्टेषुसत्सुनामचेत्यंतेपिकथनेनपूर्वपूर्वोत्पन्नाःकलाःनिमित्तीकृत्योत्तरोत्तराःकलाःपरमेश्वरेणसृष्टाइतिसूच्यते । तच्चयथोक्त

क्रमेनुपपन्नंअतोभाष्याद्युक्तदिशाक्रमोवगंतव्यः ॥ २ ॥ एतासाचकलादेवतानांजीवेनसहमोक्षेपुरुषप्राप्तिरुच्यतेयथेमानद्यइत्यादिना । यथालोकेइमाःप्रसिद्धाःस्यंदमानाःप्रस्रवंत्यःसमुद्रएवायनमाश्रयोयासांताःनद्यःसमुद्रंप्राप्यास्तमदर्शनंगच्छंतिप्रापुवंति । अज्ञानामदर्शनंगतानामपितासांसमुद्रेस्थितानांनदीनांगंगायमुनेत्यादिनामरूपेभिद्येतेविविक्तेतिष्ठतइतिएवंविद्वद्भिः

यथेमानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंतिभिद्येतेतासांनामरूपेसमुद्रइत्येवंप्रोच्यते। एवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंतिभिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यतेसएषोकलोमृतोभवति ॥ ३ ॥ तदेषश्लोकः । अराइवरथनाभौकलायस्मिन्प्रतिष्ठिताः। तंवेद्यंपुरुषंवेदयथामावोमृत्युःपरिव्यथाइति । तान्होवाच । एतावदेवाहमेतत्परंब्रह्मवेदनातःपरमस्तीति । तेहितमर्चयंतस्त्वंहिनःपितायोस्माकमविद्यायाःपरंपारंतारयसीति। नमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ४ ॥ इतिषष्ठः प्रश्नः ॥ ६ ॥ इतिषट्प्रश्नोपनिषत्समाप्ता ॥ श्रीवेदव्यासायनमः ॥

प्रोच्यते । एवमेवास्यपुरुषस्यपरिद्रष्टुर्ज्ञानिनोजीवस्यषोडशकलाःप्राणाद्याःपुरुषायणाःपुरुषएवायनंआश्रयोयेषातेतएवपुरुषंप्राप्यास्तमज्ञैरज्ञेयत्वं । गच्छंति । आसांपुरुषेस्थितानांतासांनामरूपेभिद्येतेविविक्तेतिष्ठतइत्येवंविद्वद्भिःप्रोच्यते । तथाचकलादेवतासुमुक्तिंगतासुसएषजीवःनष्टाचेतनकलोभवति । ततएवामृतोभवति । कलानिमित्तंहिमरणमस्येति ॥ ३ ॥ तत्तत्रोक्तार्थे

GDF
Sri Gargeshwari Digital Foundation

एषवक्ष्यमाणःश्लोकःसंमतित्वेनभवति। रथनाभौअराइवयस्मिन्पुरुषेकलाःप्रतिष्ठिताःतंवेद्यंवेदितव्यंपुरुषंवासुदेवंवेदयथजानीध्वंततश्चमृत्युःसंसारोवोयुष्मान्मापरिव्यथाः। मापरिव्यथयतु । पुरुषाज्ञानेसंसारव्यथाभवेत् । साभवतांमाभवत्विति। एवंसपिप्पलादः । तत्वमुपदिश्यतान्भारद्वाजादीन्प्रत्युवाच। एतदुक्तलक्षणंपरंब्रह्माहमेतावदुक्तमात्रमेववेदनातःपरंमयाविदितमस्ति। अस्मदादयःतदेकदेशविदएवनत्वपरिमितविदइतिभावः । एवमुपदिष्टास्तेमुनयस्तमाचार्यमर्चयंतःप्रणामादिनापूजयंतःइदमूचुः । भगवन् त्वंहिनःपितानिरुपाधिकोपकारकःकथंयःत्वमस्माकंअस्मान्अविद्यायाःपरंपारंतारयसिअतारयःकोहिनामैवमुपकुर्यादिति। एवमाख्यायिकांसमाप्यवेदपुरुषःशिष्यशिक्षार्थमाह। नमःपरमऋषिभ्यःपिप्पलादादिभ्यइति। द्विर्वचनमादरार्थमित्यशेषमंगलमिति। इतिषष्ठप्रश्नप्रतिवचनं ॥ ४ ॥ इतिषट्प्रश्नोपनिषत्खंडार्थःसंपूर्णः ॥ छ ॥ ॥

अयं ग्रंथः कुंभघोणस्थमध्वविलासपुस्तकालयाधिपतिभ्यां अपशंकररामाचार्य, टी. आर्.
कृष्णाचार्यनामभ्यां पंडितैः संशोध्य मुंबय्यां निर्णयसागरमुद्रणयंत्रे
मुद्रयित्वा प्रकाशितः। शके १८१९

SGDF
Sri Gargeshwari Digital Foundation

॥ षट्प्रश्नोपनिषत्खंडार्थःसंपूर्णः ॥

GDF
Sri Ganeshwari Digital Foundation